## न भूवाक्चिद्दिधिषु (१९/३७६३)

पतिशब्दे उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुषे समासे भू वाक् चित् दिधिषू इत्येतानि पूर्वपदानि[1] प्रकृतिस्वराणि न भवन्ति। पूर्वेण प्राप्तः स्वरः प्रतिषिध्यते। भूपतिः। वाक्पतिः। चित्पतिः। दिधिषूपतिः। षष्ठीसमासा एते समासस्वरेणान्तोदात्ता[2] भवन्ति॥

## वा भुवनम्। (२०/३७६४)

पतिशब्द उत्तरपदे ऐश्वर्यवाचिनि तत्पुरुष समासे भुवनशब्दः पूर्वपदं वा प्रकृतिस्वरं भवति। 'भुवनपतिः' (तै. ब्रा. ३. ७. ६. १), भुवनपतिः। [3]पूर्वपदप्रकृतिस्वरपक्षे आदिरुदात्तः[4]। 'रञ्जेः क्युन्' (उ. २४६) इति वर्तमाने 'भुसूधूभ्रास्जिभ्यश्छन्दसि' (उ. २४७) इति क्युन्प्रत्ययान्तो भुवनशब्दः आद्युदात्तो व्युत्पादितः। कथं भुवनपतिरादित्यः इति? 'उणादयो बहुलम्' (३. ३. १/३१६९) इति बहुलवचनाद् भाषायामपि प्रयुज्यते॥

## आशङ्काबाधनेदीयस्सु सम्भावने। (२१/३७६५)

[5]प्रकृत्या पूर्वपदम्, तत्पुरुषे इति वर्तते। आशङ्क आबाध नेदीयस् इत्येतेषु उत्तरपदेषु सम्भावनवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। [6]अस्तित्वाध्यवसायः सम्भावनम्। गमनाशङ्कं वर्तते। गमनमाशङ्क्यते इति सम्भाव्यते। वचनाशङ्कम्। [7]व्याहरणाशङ्कम्। आबाध – गमनाबाधम्। वचनाबाधम्। व्याहरणाबाधम्। गमनं बाध्यते इति सम्भाव्यते। नेदीयस् – गमननेदीयः। व्याहरणनेदीयः। गमनमतिनिकटतरम् इति सम्भाव्यते। सम्भावने इति किम्? परमनेदीयः। पूर्वपदानि ल्युडन्तान्युक्तस्वराणि॥

## पूर्वे भूतपूर्वे। (२२/३७६६)

पूर्वशब्दे उत्तरपदे भूतपूर्ववाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। आढ्यो भूतपूर्वः [8]आढ्यपूर्वः। पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्तते, तत्र विशेषणं विशेष्येण[9] (२. १. ५७/७३६) इति समासः, मयूरव्यंसकादिर्वा[10] द्रष्टव्यः। दर्शनीयपूर्वः। सुकुमारपूर्वः। भूतपूर्वे इति किम्? परमपूर्वः। उत्तमपूर्वः। अत्र परमश्चासौ पूर्वश्च इति समासो, न तु परमो भूतपूर्वः इति। तथा [11]हि सति उदाहरणमेव भवति॥

## सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये। (२३/३७६७)

सविध सनीड समर्याद सवेश सदेश इत्येतेषु उत्तरपदेषु सामीप्यवाचिनि तत्पुरुषे समासे पूर्वपदं प्रकृतिस्वरं भवति। मद्रसविधम्। गान्धारिसविधम्। काश्मीरसविधम्। मद्रसनीडम्। गान्धारिसनीडम्। काश्मीरसनीडम्। मद्रसमर्यादम्। गान्धारिसमर्यादम्। काश्मीरसमर्यादम्। मद्रसवेशम्। गान्धारिसवेशम्। काश्मीरसवेशम्। मद्रसदेशम्। गान्धारिसदेशम्। काश्मीरसदेशम्। पूर्वपदान्युक्तस्वराणि। सविधादीनां सह [12]विधया इत्येवमादिका व्युत्पत्तिरेव केवलम्। समीपवाचिनस्त्वेते समुदायाः। मद्राणां सविधम् [13]समीपम् इत्यर्थः। सामीप्ये इति किम्? [14]सह मर्यादया वर्तते समर्यादं क्षेत्रम्। देवदत्तस्य समर्यादम् देवदत्तसमर्यादम्। सविधादिषु इति किम्? देवदत्तसमया॥

---

1. समासस्वरेण इत्यधिकम् ब. 2. च इत्यधिकम् क. 3. पूर्वपदात् ड, नास्ति ह. 4. भवति इत्यधिकम् ह. 5. प्रकृत्या पूर्वपदं नास्ति फ. 6. अस्तित्वनिश्चयः क. 7. व्याकरणशङ्कम् फ. 8. आढ्यपूर्वः नास्ति फ. 9. बहुलम् इत्यधिकम् ह. 10. वा नास्ति फ. 11. च ब. ड. फ. 12. विधीयते ग. 13. सामीप्यम् फ. 14. सह नास्ति फ.